श्रीः

श्रीमते रामानुजाय नमः

॥ पुरुषसूक्तम् ॥

॥ हरिः ओं ॥ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाग्ंश्च पूरुषः॥ १ ॥

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥ २ ॥

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन्परिधयः। त्रिस्सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः॥ ३ ॥

तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। सम्भृतं पृषदाज्यम्। पशूग्स्ताग्श्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे। छन्दाग्ंसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥ ४ ॥

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः॥ ५ ॥

ऊरू तदस्य यद्वैश्यः। पद्भ्यागं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः-स्सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्यां आसीदन्तरिक्षम्। शीर्ष्णो द्यौस्समवर्तत। पद्भ्यां भूमिर्दिशश्श्रोत्रात्। तथा लोकागं अकल्पयन्॥ ६॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्-प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः॥ ७॥

अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि। तस्य त्वष्टा विद-धद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते॥ ८॥

तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे॥ ९॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥ १०॥

श्रीः

श्रीमते रामानुजाय नमः

॥ नारायणसूक्तम् ॥

॥ हरिः ओं ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्। विश्वं नारायणं देवमक्षरं परमं प्रभुम्। विश्वतः परमं नित्यं विश्वं नारायणगं हरिम्। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायणपरं ब्रह्म तत्वं नारायणः परः। नारायण परो ज्योतिरात्मा नारायणः परः। यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशंभुवम्। पद्म कोशप्रतीकाशगं हृदयं चाप्यधोमुखम्। अधो निष्टया वितस्त्यां तु नाभ्यामुपरि तिष्ठति। हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्। सन्ततगं सिराभिस्तु लम्बत्या कोशसन्निभम्। तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः। सन्तापयति स्वं देहमापादतलमस्तकम्। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्यात्तनूपमा। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

श्रीः

श्रीमते रामानुजाय नमः

॥ विष्णुसूक्तम् ॥

॥ हरिः ओं ॥ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कंभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ १ ॥

तदस्य प्रियमभिपाथो अश्याम्। नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था। विष्णोः पदे परमे मध्व उथ्सः। प्रतद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा। परो मात्रया तनुवा वृधान। न ते महित्वमन्वश्नुवन्ति ॥ २ ॥

उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वं। परमस्य विथ्से। विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिं सुजनिमाचकार। त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषग्ग् ह्यस्य स्थविरस्य नाम ॥ ३ ॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्यास्सप्तधामभिः। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन्। विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यस्सखा ॥ ४ ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम्॥ ५ ॥

मनंसः काममाकूंतिं वाचस्सत्यमंशीमहि।
पशूनां रूपमन्नंस्य मयि श्रीश्श्रंयतां यशंः॥
कर्दमेंन प्रंजा भूता मयि संभंव कर्दम।
श्रियं वासयं मे कुले मातरं पद्ममालिंनीम्॥
आपंः सृजन्तु स्निग्धानि चिक्लीत वंस मे गृहे।
नि चं देवीं मातरं श्रियं वासयं मे कुले॥
आर्द्रां पुष्करिंणीं पुष्टिं पिङ्गलां पंद्ममालिनीम्। Sooryan
चन्द्रां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह॥
आर्द्रां यः करिंणीं यष्टिं सुवर्णां हेममालिनीम्। Chandran
सूर्यां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह॥
तां म आवंह जातंवेदो लक्ष्मीमनंपगामिनींम्।
यस्यां हिरंण्यं प्रभूंतं गावों दास्योऽश्वांन् विन्देयं पुरुंषानहम्॥
पद्मप्रिये पद्मिनि पंद्महस्ते पद्मालये पद्मदलांयताक्षि।
विश्वप्रिये विष्णुमनोंऽनुकूले त्वत्पांदपद्मं मयि सन्निंधत्स्व॥
श्रियै जात श्रिय आनिर्याय श्रियं वयों जनितृभ्यों दधातु।
श्रियं वसांना अमृतत्वमायन् भवंन्ति सद्यस्समिधा मितद्यून्॥

श्रिय एवैनं तच्छ्रियामांदधाति। सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रजंया पशुभिंः। य एवं वेद॥ ओं महादेव्यै चं विद्महे विष्णुपत्न्यै चं धीमहि। तन्नों लक्ष्मीः प्रचोदयांत्॥

श्रीः

श्रीमते रामानुजाय नमः

॥ श्रीसूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥
अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम्॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम्॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम्॥

श्रीः

श्रीमते रामानुजाय नमः

॥ भूसूक्तम् ॥

॥ हरिः ओं ॥ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा। उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे। आऽयङ्गौः पृश्निरक्रमी दसनन्मातरं पुनः। पितरं च प्रयन्त्सुवः। त्रिंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः। अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन् महिषः सुवः। यत्वा क्रुद्धः परो वप मन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्।

मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसूवरी। रसने सत्यायने सीद। समुद्रवती सावित्री हनो देवी मह्यङ्गी। महोधरणी महो व्यतिष्ठाः शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी। इन्द्रपत्नी व्यापिनी सुरसरिदिह। वायुमती जलशयनी श्रियंधा राजा सत्यन्धो परिमेदिनी। श्वोपरिधत्तं गाय।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम्।

ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्॥ शृण्वन्ति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्। महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीं मेनागं हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणेति श्रव इच्छमाना। पुण्यग्ं श्लोकं यजमानाय कृण्वती॥

श्रीः

श्रीमते रामानुजाय नमः

॥ नीळासूक्तम् ॥

॥ हरिः ओं ॥ नीळां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः। गृणाहि। घृतवती सवितुराधिपत्यैः पयस्वती रन्तिराशानो अस्तु। ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता। बृहस्पतिर्मातरिश्वोत वायुस्संन्धुवाना वाता अभि नो गृणन्तु। विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी। ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो नीळा प्रचोदयात्॥